संस्कृत-त्रैमासिक-पत्रिका
वार्षिक रू. १५०

ISSN 2321-1342

# देवसायुज्यम्

वर्ष-११, जुलाई-२०१८ तः डीसेम्बर-२०१८
( संयुक्ताङ्कौ : ७६-७७ )




सम्पादकः डॉ. प्रफुल्लः पुरोहितः

Scanned with CamScanner

## ५. ।। संस्कृतभारतीप्रकाशितेषु आधुनिकसंस्कृतगीतेषु रसभावध्वनिः।।

संस्कृतभारती-बेङ्गलुरुद्वारा संस्कृतगीतानां पुस्तकत्रयं गीतसंस्कृतं, गेयसंस्कृतं, बालसंस्कृतम् इति प्रकाशितमासीत्। पुनश्च पाठकानां सौकर्यार्थं संस्कृतभारती-गुजरातद्वारा पुस्तकत्रयस्य संस्कृतगीतानां संग्रहं कृत्वा "गीतमञ्जरी" इति पुस्तकस्य प्रकाशनम् अभवत्। आधुनिके कालेऽपि बहुनि काव्यानि संस्कृते लिखितानि। तत्र महाकाव्यानि, खण्डकाव्यानि, ऐतिहासिककाव्यानि, शतकानि, मुक्तकानि, गद्यकाव्यानि, स्तोत्रकाव्यानि प्रायशः भवन्ति। किन्तु एतानि काव्यानि तु संस्कृतज्ञानां कृते उपयुक्तानि अथवा संशोधनस्य विषयत्वेन उपयुज्यमानानि वर्तन्ते। तेन प्रतिष्ठाप्राप्तिः वा पुस्तकसंख्यावृद्धिः भवति। लेखको वा कविः आत्मसन्तुष्टिं प्राप्नोति तावदेव। क्वचित् कस्यचित् विश्वविद्यालयस्य पुस्तकालये अलङ्कृतानि एतानि काव्यानि वर्षाणि यावत् तथैव तिष्ठन्ति। अधिकानि ख्यातिप्राप्तानि पुस्तकानि स्नातककक्षायां वा अनुस्नातककक्षायां पाठ्यक्रमे स्थानं प्राप्नुवन्ति तावदेव।

संस्कृतभारतीद्वारा प्रकाशितानि आधुनिक संस्कृतगीतानि जनसाधारणस्य कृते। पुनश्च अबालवृद्धानां मनोरञ्जनाय, संस्कृत्याः, संरक्षणाय, संस्कृतभाषायाः प्रसाराय च, देशभक्तिवर्धनाय, कार्यकर्तृणां निष्ठाविवर्धनाय, समर्पणभावोद्पिनाय एतानि संस्कृतगीतानि रचितानि सन्ति। शिशुबालानाम् आनन्दप्रेरणाय शिशुगीतानि अपि अत्र सन्ति। देशभक्तिः, संस्कृतमातृप्रीतिः, कार्यकर्तृणां निष्ठा, समर्पणभावोद्पनम् इत्यादयः उदात्ताः विषयाः उपात्ताः इति तु अस्य सङ्ग्रहस्य वैशिष्टयम्।

देशभक्तिः - भाषा-धन-मत-जातिविभेदं प्रदर्शयति एतत् गीतम् यथा -

**विस्मृतभेदाः सन्तो**
**निर्मलभावापन्नाः**
**एकीभावं हृदयारूढं सततं कुर्वन्तुऽऽ**
**भो भोः सततं कुर्वन्तुऽ॥ इति**
**पूर्वज-मुनिजन-कविना-वाञ्छा सर्वेषामैक्यं,**
**सुखिनस्सर्वे सन्विति गानं तेषां बहुहृद्यम्।**
**भाषा-धन-मति-जाति-विभेदः हृदये मा भवतु**
**दुःखित-दीन-जनानुन्नेतुं हस्ताः प्रसरन्तुऽऽ**
**भो भोः प्रसरन्तुऽ॥ इति तादृशं भावं प्रकटीकरोति।**

अपरं गीतम् यथा " भारतमाता जननी पुत्रोऽहं सेवाकर्ता" इति भावना कवेः विद्यते।



Scanned with CamScanner

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम्।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः।।"

इति जनार्दन हेगडे द्वारा रचितम् उत्तमं देशभक्तिगीतमस्ति, कविः कथयति यत् अत्र दीपनुतिः अपि शत्रुपरा भवति। अस्माकं जीवनलक्ष्यं धनपदवी न अपि तु परशिवपदसेवा वर्तते। श्रीनारायणभट्टेन लिखितं - हिमगिरेः श्रृङ्गम्" अपि भारतमातुः गौरवपरिरक्षायै अस्मभ्यं प्रेरणां ददाति।

जय जय भारतदेश, भूमिरियं बलिदानस्य, अमृतस्य पुत्रा वयम्, वन्दे भारतमातरम् जय भारतजननी, इत्यादीनि उत्तमानि देशभक्तिगीतानि। जागृहि त्वं भारतीय, प्रबुद्धात्मन् गायं गीतं इत्यादिः एतादृशेषु संस्कृतगीतेषु देशभक्तिरूपो भावध्वनिः।

**संस्कृतमातृप्रीतिः -**

बहूनां गीतानां विषयोऽयं वर्तते। यथा -

**मुनिवरविकसित - कविवरविलसित - मञ्जुलमञ्जूषा, सुन्दरसुरभाषा।**
**अयि मातस्तव पोषणक्षमता मम वचनातीता, सुन्दरभाषा।। इति**

तादृशम् एव गीतम् - यथा -

**चिरनवीना संस्कृता एषा, गीर्वाणभाषा**
**चिरनवीना संस्कृता एषा।**
**महतो भूतस्य निःश्वसितम् अस्ति यस्माम्,**
**अतिपुरातन - वेदसाहित्यम् शास्त्रपूरैः स्मृतिविचारैः**
**वरकवीनां काव्यसारैः**
**चित्रिता मञ्जुला मञ्जूषा, मञ्जुला भाषा।।**

संस्कृतेन सम्भाषणं कुरु, संस्कृतस्य सेवनम्, रचयेम संस्कृत-भवनम्, विधेयं संस्कृतरक्षणं, अवनितलं पुनरवतीर्णा स्यात् इत्यादीनि गीतानि संस्कृतस्य महत्त्वं प्रदर्शयन्ति, तथा च सरलतया ऐतेषां गीतानां गानं अपि शक्यम्। तेन आनन्देन संस्कृतस्य प्रचारः प्रसारः अपि भवति। यथा इदानीन्तनछात्राः चलचित्रस्य गीतानि विना क्लेशमेव कण्ठस्थं कुर्वन्ति तथैव ऐतेषां गीतानामपि कण्ठस्थीकरणं भवितुं शक्नोति। एतादृशेषु गीतेषु संस्कृतभक्तिरूपो भावध्वनिः ध्वन्यते।

कार्यकर्तॄणाम् उत्साहवर्धनाय, निष्ठायै तथा च समर्पणभावोपद्पिनाय अत्र सन्ति बहुविधानि गीतानि। उत्साहवर्धनाय रचितानि गीतानि यानि सन्ति तत्र तु वीररसो व्यञ्जयते। अन्यत्र भावध्वनिः। यथा -

**(१) चमूः प्रवृत्ता संस्कृतबन्धूनाम्**
**संस्कृतयष्टिधरा संस्कृतधुरन्धरा।। इति**

(२) पाठयेम संस्कृतं जगति सर्वमानवान्।
प्रापयेम भारतं सपदि परमवैभवम्॥ इति
(३) भारतभूषा संस्कृतभाषा विलसतु हृदये।
संस्कृतिरक्षा राष्टसमृद्धिः भवतु हि भारतदेशे॥

शिशुगीतानि तु बहूनि सन्ति। बालकान् अभिनयेन सह पाठयितुम् उत्तमानि, सरलानि च गीतानि एतानि। यथा -

चटक चटक, रे चटक !
चिर्वं चिर्वं, कूजसि त्वं विहग !
नीडेनिवसति सुखेन डयसे
खादसि फलानि मधुराणि।
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता॥

एतैः गीतैः बालकानां ज्ञानवृद्धिः अपि भवति। वासराणां ज्ञानार्थं प्रस्तुतमस्ति गीतम् - यथा -

सप्ताहे ग्रहचक्रं कुरु प्रदक्षिणम्।
प्राप्नोषि मङ्गलं लभ्यते रक्षणम्।
अद्य भानुवासरः सूर्यदेवनमनम्।
सोमवासरे स्मर सोमदेवकिरणम्।
मङ्गलवासरे कुरु मङ्गलाचरणम्।
बुधवासरे कर्तव्यं बुधदेवस्मरणम्।
गुरुवासरे भज श्रीगुरोश्चरणम्।
शुक्रवासरे पश्य दीप्तशुक्रवर्णम्।
शनिवासरे कर्तव्यं शनीश्चरस्तवनम्। इति

तादृशानि ४२गीतानि अत्र सन्ति। समेषाम् उल्लेखं न शक्यम्। प्रत्येकं गीतं किमपि किमपि नूतनं बालकाय प्रददाति। अत्र जन्मदिनस्य शुभकामनायाः गीतम्, स्वागतस्यापि गीतम्, "आम्लं द्राक्षाफलम्" इति कथायाः अपि गीतम् च वर्तते। एतादृशेषु गीतेषु वात्सल्यरूपो भावध्वनिः द्योत्यते। गीतमञ्जर्याम् आहत्य १०८ गीतानि सन्ति। विविधानां गीतानां गानेन भिन्नरसानुभूतिः च भवति। क्वचित् भावध्वनिः अपि वर्तते। अत्र भिन्नानां कवीनां गीतसङ्ग्रहः कृतः। सर्वाणि गीतानि संस्कृतभाषया वृत्तबद्धानि गातुं सरलानि च। एतेषां गीतानां ध्वनिमुद्रिकानिर्माणं सान्द्रमुद्रिकानिर्माणं च कृतमस्ति।

डॉ. ललितकुमारः पटेलः



Scanned with CamScanner